## अवाद् ग्रः । (५१/२७२४)

'[1]गॄ निगरणे' (धा.पा. १४१०) इति तुदादौ पठ्यते, तस्येदं ग्रहणम् । न [2]तु 'गॄ शब्दे' (धा.पा. १४९८) [3]इति क्र्यादिपठितस्य । [4]तस्य ह्यवपूर्वस्य प्रयोग एव नास्ति (म.भा. १.२८३) । शेषात् कर्तरि परस्मैपदे (१.३.७८/२१५९) प्राप्ते अवपूर्वाद् गिरतेरात्मनेपदं भवति । अवगिरते, [5]अवगिरेते, अवगिरन्ते । अवात् इति किम्? गिरति ॥

## समः प्रतिज्ञाने । (५२/२७२५)

[6]ग्रः इति वर्तते । संपूर्वात् गिरतेः प्रतिज्ञाने वर्तमानादात्मनेपदं भवति । प्रतिज्ञानम् अभ्युपगमः[7] । शतं संगिरते[8] । नित्यं शब्दं संगिरते[9] । प्रतिज्ञाने इति किम्? सङ्गिरति ग्रासम् ॥

## उदश्चरः सकर्मकात् । (५३/२७२६)

शेषात् कर्तरि परस्मैपदे (१.३.७८/२१५९) प्राप्ते उत्पूर्वाच् चरतेः सकर्मकक्रियावचनादात्मनेपदं भवति । गेहमुच्चरते । कुटुम्बमुच्चरते । [10]गुरुवचनमुच्चरते । उत्क्रम्य गच्छति इत्यर्थः । सकर्मकात् इति किम्? [11]बाष्पमुच्चरति ॥

## समस्तृतीयायुक्तात् । (५४/२७२७)

सम्पूर्वाच् चरतेस्तृतीयायुक्तादात्मनेपदं भवति । [12]तृतीया इति तृतीयाविभक्तिर्गृह्यते, तया चरतेरर्थ-द्वारको योगः । अश्वेन सञ्चरते[13] । तृतीयायुक्तात् इति किम्? उभौ लोकौ सञ्चरसि इमं चामुं च [14]देवल (म.भा. १.२८३) । यद्यप्यत्र तदर्थयोगः सम्भवति, तृतीया तु न श्रूयते, इति प्रत्युदाहरणं भवति ॥

## दाणश्च सा चेच्चतुर्थ्यर्थे । (५५/२७२८)

'दाण् दाने' (धा.पा. ९३०) परस्मैपदी । ततः [15]सम्पूर्वात् तृतीयायुक्तात् आत्मनेपदं भवति, सा चेत् तृतीया चतुर्थ्यर्थे [16]भवति । कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात्? वक्तव्यमे[17]वैतत्—

[५१] अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति[18] वक्तव्यम् ।

दास्या संप्रयच्छते[19] । [20]वृषल्या संप्रयच्छते (म.भा.१.२८४) । [21]कामुकः सन् दास्यै ददाति इत्यर्थः । चतुर्थ्यर्थे इति किम्? पाणिना संप्रयच्छति । समः प्रशब्देन व्यवधाने [22]कथमात्मनेपदं भवति? समः इति [23]विशेषणे षष्ठी, न पञ्चमी[24] ॥

---

1. गृ ह. 2. तेन फ. 3. इत्यादि ब, क्रियादि फ. 4. तस्य नास्ति ह, हि नास्ति अ. 5. उदाहरणमिदं नास्ति अ. ब. फ. 6. गिरः फ. 7. प्रतिश्रवोऽङ्गीकरणं इत्यधिकम् अ. क. फ. ह. 8. शतं प्रतिजानीते इत्यधिकम् अ.ह. 9. वैयाकरणः इत्यधिकम् क.फ.ह, सन्तं च सर्वत्र संगिरन्ते शिष्याः इत्यधिकम् फ. 10. गुरुवचः ह. 11. वाष्प उच्चरति ड. 12. वाक्यमिदं नास्ति ड. 13. रथेन सञ्चरते इत्यधिकम् क. ड. फ. ह. ई. 14. नारद अ. 15. च इत्यधिकम् क. 16. वर्तते ड. 17. एव नास्ति फ. 18. इति वक्तव्यम् नास्ति क.ड.फ. 19. मालाम् इत्यधिकम् फ. प मं न्या. 20. उदाहरणमिदं नास्ति फ. 21. कामुकः सः ड. 22. कथं न तृतीयात्मनेपदं फ. 23. विशेषणषष्ठी क. ड. ह. ई. प मं. 24. अशिष्टव्यवहारे इति किम्? मात्रे संप्रयच्छति इत्यधिकम् क.